॥ श्रीः ॥

# ॥ विश्वनाथाष्टकम् ॥

गङ्गातरङ्गरमणीयजटाकलापं
गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ २

भूताधिपं भुजगभूषणभूषिताङ्गं
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ३

शीतांशुशोभितकिरीटविराजमानं
फालेक्षणानलविशोषितपञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४

पञ्चाननं दुरितमत्तमतङ्गजानां
नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराऽटवीनां
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ५

तेजोमयं सगुणनिर्गुणमद्वितीयं
आनन्दकन्दमपराजितमप्रमेयम् ।
नादात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ।। ६

आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ।। ७

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं
वाराणसीपुरपतिं भज विश्वनाथम् ।। ८

वाराणसीपुरपतेः स्तवनंशिवस्य
व्यासोक्तमष्टकमिदंपठते मनुष्यः ।
विद्यांश्रियं विपुलसौख्यमनन्तकीर्तिम्
सम्प्राप्य देहविलये लभते च मोक्षम् ।। ९

विश्वनाथाष्टकमिदं यःपठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।। १०

इति श्री वेदव्यासविरचितं विश्वनाथाष्टकं सम्पूर्णम् ।।

